ॐ

## गणेशस्तवः

अजं निर्विकल्पं निराकारमेकं निरानंदमानंदमद्वैतपूर्णम् ।
परं निर्गुणं निर्विशेषं निरीहं परब्रह्मरूपं गणेशं भजेम ॥ १ ॥
गुणातीतमानं चिदानंदरूपं चिदाभासकं सर्वगं ज्ञानगम्यम् ।
मुनिध्येयमाकाशरूपं परेशम् परब्रह्मरूपं गणेशं भजेम ॥ २ ॥
जगत्कारणं कारणज्ञानरूपं सुरादिं सुखादिं गुणेशं गणेशम् ।
जगद्व्यापिनं विश्ववन्द्यं सुरेशं परब्रह्मरूपं गणेशं भजेम ॥ ३ ॥
रजोयोगतो ब्रह्मरूपं श्रुतिज्ञं सदाकार्यसक्तं हृदाऽचिंत्यरूपम् ।
जगत्कारणं सर्वविद्यानिदानं परब्रह्मरूपं गणेशं नातः स्मः ॥ ४ ॥
सदा सत्ययोग्यं मुदा क्रीडमानं सुरारीन्हरंतं जगत्पालयंतम् ।
अनेकावतारं निजज्ञानहारं सदा विश्वरूपं गणेशं नमामः ॥ ५ ॥
तमोयोगिनं रुद्ररूपं त्रिनेत्रं जगद्धारकं तारकं ज्ञानहेतुम् ।
अनेकागमैः स्वं जनं बोधयंतं सदा सर्वरूपं गणेशं नमामः ॥ ६ ॥
नमः स्तोमहारं जनज्ञानहारं त्रयीवेदसारं परब्रह्मसारम् ।
मुनिज्ञानकारं विदूरे विकारं सदा ब्रह्मरूपं गणेशं नमामः ॥ ७ ॥
निजैरोषधीस्तर्पयंतं कराद्यैः सुरौघान्कलाभिः सुधास्राविणीभिः ।
दिनेशांशुसंतापहारं द्विजेशं शशांकरूपं गणेशं नमामः ॥८ ॥

प्रकाशस्वरूपं नमो वायुरूपं विकारादिहेतुं कलाधारभूतम्।
अनेकक्रियानेकशक्तिस्वरूपं सदा शक्तिरूपं गणेशं नमामः॥ ९॥

प्रधानस्वरूपं महत्तत्त्वरूपं धराचारिरूपं दिगीशादिरूपम्।
असत्सत्स्वरूपं जगद्धेतुरूपं सदा विश्वरूपं गणेशं नताः स्मः १०
त्वदीये मनः स्थापयेदंघ्रियुग्मे जनो विघ्नसंघातपीडां लभेत।
लसत्सूर्यबिम्बे विशाले स्थितोऽयं जनो ध्वांतपीडां कथं वा लभेत॥ ११॥
वयं भ्रामिताः सर्वथाऽज्ञानयोगाद लब्धस्तवांघ्रिं बहून्वर्षपूगान्।
इदानीमवाप्तस्तवैव प्रसादात्प्रपन्नान्सदा पाहि विश्वम्बराद्य ॥ १२॥
एवं स्तुतो गणेशस्तु संतुष्टोऽभून्महामुने। कृपया परयोपेतोऽभिधातुमुपचक्रमे॥ १३

इति श्रीमदृषिप्रणीतो गणेशस्तवः सम्पूर्णः

O lord, thou art unborn, absolute and formless; thou art beyond bliss and again bliss itself, the One and Infinite. Though art supreme without attributes, differentiation and desire. Though art verily the supreme Brahman. O Lord, to thee we offer our worship.

Thy nature is beyond attributes. Thou art the embodiment of intelligence and bliss, the effulgent Spirit, the all pervading, the goal of knowledge. Thou art the object of meditation to the sages, formless and omnipresent like ether. Thou art verily the supreme Brahman. O lord, we offer our worship to thee.

Thou art the cause of universe and the very knowledge of cause, the origin of gods, origin of bliss, the lord of gunas, the lord of heavenly hosts. Thou pervadest the universe and are worshipped by all. Thou art the lord of gods. Thou art verily the supreme Brahman. O lord, we offer our worship to thee.